This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M304 विषय काव्य.

नाव: भारतचम्पू (10 स्तबक) मुद्रित.

लेखक/लिपीकार अनंतभट्ट.

पृष्ठ 12 काळ शके 1786 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ भारतचंपोदशमस्तबकः प्रारभ्यते॥ राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अथसटीकचंपुभारतद्रोणस्तबकः प्रारभ्यते॥ गद्यं॥ अन्येद्युः अभिमन्युवधात् द्वितीयदिवसे भानौ अवलंबितः प्रथमशिखरि
णः उदयाचलस्यसानुर्येन तस्मिन् सतिसिंधुराजयोः जयद्रथसमुद्रयोः युगले स्कंधावारयोः शिबिरयोः युगस्ययो वसुंधराधिपती धर्मराज दुर्योधनौतयोः
युद्धसन्नाहस्ययुद्धविषयकसन्नद्धतायाः पैशुन्यं सूचकत्वं तस्मिन्लंपटः तत्स्वभावः योपटहध्वानः तेन तरले भीरौ चंचले सति शरणागतस्य भरणे पालने

॥गद्यं॥ अन्येद्युरवलंबितप्रथमशिखरिसानौ भानौ स्कंधावारयुगवसुंधराधिपतियुद्धसन्नाहपैशून्यलंपटपटहध्वानतरलेसिंधु
राजयुगले शरणागतभरणालंकर्मीणेन भगवतापाणिमित्रतोत्रेणपद्मनेत्रेणसौभद्रवधशोकातिरेकपरिगलितभूरजन
बाष्पपूरपंकिले द्वारतले समानीतं सौवीरनायकगोपनस्थलदिदृक्षयेवतुंगतरकेतुशृंगमधिरूढेन कपिपरिवृढेनपरिमंडितं
मानससगरुडगंधवहमार्गणबांधवैः सैंधवैराहितबंधनंस्यंदनमधिरुह्यसंक्रंदननंदनः समरोचितवेषसंपदविकलेननिजबलेन
सहप्रतिष्ठमानो निरुत्थवियत्पथैर्मंदबंधुरैः सिंधुरैर्विविधगतिनाटकैर्घोटकैः द्रुततरणासत्तिभिः पत्तिभिश्चविरचितपरिपंथिजन
मोहस्यव्यूहस्यपृष्ठभागे जयद्रथंप्रतिष्ठाप्यस्वयमपिपुरोभागंपरिष्कुर्वाणस्य द्रोणस्य चरणयोर्बाणाभ्यांप्रणीतप्रणिपातस्तेनदी
यमानमार्गावकाशश्चंडमारुतइवघनमंडलंतमेवव्यूहंक्षणादेवक्षोभयामास॥१॥ अलंकर्मीणेन समर्थेन पाणिमित्रं पाणौविद्यमानं तोत्रंक १
शायस्य तेन भगवता पद्मनेत्रेण कृष्णेन सौभद्रवधेनयः शोकातिरेकः शोकातिशयः तेनपरिगलितानां भूरजनबाष्पाणां पूरेणपंकिले पंकयुते द्वारतले आनीतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सौवीरनायकस्य जयद्रथस्य यज्ञोपनस्थलं रक्षणस्थलं तस्य दिदृक्षयेव द्रष्टुमिच्छयेव तुंगतरं उच्चतरं यत्केतुश्रृंगं ध्वजाग्रं तत् अधिरूढेन कृतारोहणेनक-
पिपरिवृढेन हनुमता परिमंडितं शोभितं मानसंमन: मार्गण: बाणश्च गरुडश्च गंधवह: वायुश्च तेषां बांधवै: आशुगत्यासदृशै: सैंधवै: अश्वै: आहितं निहितं
धनं यस्मिन्तं स्यंदनं रथं अधिरुह्य संक्रंदननंदन: अर्जुन: समरोचितवेषाणां संपदा अविकलेन युक्तेन निजबलेन स्वसैन्येन सह प्रतिष्ठमान: निरुद्ध: उच्चत-
याविपत्पथो येस्ते: रथै: मदेन बंधुरै: व्याप्तै: सिंधुरै: गजै: विविधगतिभि: नानागतिभि: नटंति नृत्यंति तै: घोटकै: कृतारणे आसत्ति: सान्निध्यं यैस्ते: पत्ति
भि: पदैश्च विरचित: कृत: परिपंथिजनानां शत्रुजनानां मोह: अंत: प्रवेशादि भ्रांतिर्यस्य तस्य व्यूहस्य पृष्ठभागेजयद्रथं प्रतिष्ठाप्य स्वयमपि पुरोभागं व्यू

॥ तदनंतरं ॥ पद्यं ॥ संशप्तकास्फुरपलायनवेगभंगीं तत्तादृशीमभिनयन्निवशौरिनुन्नः वेगेनविस्म
यकरेणविरोधिसैन्ये विष्वक्चचारविजयस्यशतांगवर्यः ॥ १ ॥

हाग्रभागं परिष्कुर्वाणस्य अलंकुर्वाणस्य द्रोण
स्य चरणयो: बाणाभ्यां प्रणीत: कृत: प्रणिपात: नमस्कारो येन स: अतएव तेन द्रोणेन दीयमान: व्यूहांतर्गमनाय मार्गावकाशो यस्य तथा भूत: सन् चंडमा
रुत: मेघमंडलमिव तमेव व्यूहं क्षणात् क्षोभयामास ॥ १ ॥ प० शौरिनुन्न: कृष्णप्रेरित: विजयस्य शतांगवर्य: रथश्रेष्ठ: सा चासौ ता दृशी च तत्तादृशी तां
संशप्तका: संग्रामादनिवर्तिन: ये अस्फुरा: अस्फुरांशा भटा: तेषां पलायनवेगस्य भंगीं रीतिं अभिनयन्निव एतादृश: पलायनवेग इति अभिनयेन द
र्शयन्निव विस्मयकरेण वेगेन विरोधिसैन्ये शत्रुसैन्ये विष्वक् आसमंतात् चचार अन्योपि परगतिं अभिनयेन दर्शयति ॥ १ ॥ ॥ ५ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र रणांगणे धूलिमिषेण धूलिकपटेन निह्नुतः आच्छादितः दिनेश्वर एव दीपो येन तस्मिन् तमसि जृंभिते वृद्धिंगते सति सैन्यरजोभिः सूर्याच्छादनादंधकारे समुद्भूते सतीत्यर्थः युधि पांडवसेना सहसा अकस्मात् रिवद्यते स्म कुरुसेना हृष्यते स्म उभयत्रापि हेतुः सूर्यास्तंमत्वा इदानीं कृतप्रतिज्ञस्य अर्जुनस्याग्नौ प्रवेशसंभावना ॥ २॥ युद्धे एतेन अर्जुनेन मुहुः पुनः पुनः विकृष्टं बाणमोचनार्थं आकर्णमाकृष्टं गांडीवधनुः स्वस्य यत् नामधेयं गांडीवेति नाम तस्मि-

तत्र निह्नुतदिनेश्वरदीपे जृंभिते तमसि धूलिमिषेण रिवद्यते स्म युधि पांडवसेना हृष्यते स्म सहसा कुरुसेना २
गांडीवमेतेन मुहुर्विकृष्टं ह्रस्वं च दीर्घं च बभूव युद्धे तुलामिव वर्णेन सहाधिरोढुं स्वनामधेयस्थितिशालिनेव ३ अस्तंग
तश्चेदरविंदबंधुर्वध्याभवेत्सापि मदीयसंधा इतीव संक्रंदननंदनोसौ तदीयमार्गं रुरुधे शरौघैः ४

नु स्थितिशालिना वा सकर्त्रा इवर्णेन सह तुलां सादृश्यं अधिरोढुं आप्तुमिव ह्रस्वं दीर्घं च बभूव धनुः आकर्षणसमये ह्रस्वं भवति बाणप्रक्षेपानंतरं ज्यामोचनात् दीर्घं च भवति कपिध्वजस्य गांडीव गांडिवौ पुंनपुंसकावित्यमरात् गांडीवशब्दे इकारस्य ह्रस्वत्वं दीर्घत्वं च ॥ ३॥ अरविंदबंधुः सूर्यः अस्तंगतः स्याच्चेत्तर्हि सापि मदीया संधा प्रतिज्ञा वंध्या जयद्रथवधाभावात् निष्फला भवेत् इति हेतोरिव असौ संक्रंदननंदनः अर्जुनः तदीयमार्गं सूर्यस्य गम्यमार्गं आकाशं शरौघैः रुरुधे ॥ ४॥ ॥ ७॥ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असौधनंजयः शितभल्लैः तीक्ष्णबाणैः कृत्वाकृत्तैः छिन्नैः अतएवमृदामृत्तिकयासंगतेनसंलग्नेन ओष्ठयोः पुटेन भुवंभुंजते भक्षयंति भुंजंतिपालयंतिच-
ते भूभुजः तेषांसंबंधितो स्पष्टं ब्रुवाणोरिवसूचयद्भिरिवेत्यर्थः शिरोभिः धात्रींभूमिंछादयतिस्म ॥५॥ अथयद्भ्रमभ्योर्जुनोयच्चकार तदाह वंकमिति तत्ररणां
गणेरूपर्वाधिभुवः इंद्रस्यपुत्रोर्जुनः इषुभिः वंकंराजानं कंककुलस्य आमिषंभक्ष्यमांसंकुर्वन्निति क्रियायाइहोत्तरत्रापिसंबंधः पुनः ततः कलिंगंरा

मृत्संगतेनोष्ठपुटेनभूभुक्संबंधितांस्पृष्टमिवब्रुवाणैः धनंजयोसौशितभल्लकृत्तैः शिरोभिराच्छादयतिस्मधात्रीं
॥५॥ वंकंकंककुलामिषंधृतविपल्लिंगंकलिंगंपुनर्भोजंभाजनमापदांयमपुरीसीमारुधंमागधं चोलंदुःखनि
चोलच्चित्तमिषुभिः कुर्वन्रूपर्वाधिभूपुत्रस्तत्रदिनावसानसमयेरुंधेस्मसिंधूद्वहं॥ ६ ॥ ॥ ॥

जानंधृतंविपल्लिंगं मरणचिह्नं
येनतं भोजंनृपं आपदांमरणदुःखानां भाजनंपात्रं मागधं मगधदेशीयं राजानं यमपुरीसीमांरुणत्धिस्वीकरोतितथाभूतं चोलं चोलदेशीयंनृपं दुःख
निचोलः आच्छादनपटो यस्य तथाविधंचित्तं यस्यतंदुःखव्याप्तचित्तमित्यर्थः कुर्वन् सन् दिनावसानसमये सिंधूद्वहं जयद्रथं रुंधेस्म रुरुधे-
अर्जुनो व्यूहप्रदेशे तत्रतत्रस्थितान् राज्ञोहत्वा जयद्रथसमीपंजगामेतिभावः॥ ६॥ ॥७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रांतरे तत्समये भयभरात् उत्तपमाना उत्कृष्ट दुःखयुताधीर्यस्यसः भूपः धर्मराजस्तु इंद्रात्मभू वार्ता अर्जुनवार्ताजिज्ञासुःसन् सात्यकिः मारुतिः भीमश्च तौरिपुचमूव्यूहं प्रतिप्राहिणोत् प्रेषयामास तौसात्यकिमारुतीरिपुं द्रोणंजित्वा धर्मराजायस्वजयसूचनार्थं आत्त सिंहनादौ कृतसिंहनादौसंतौ कुरून् कुरुसैनिकान् क्षोभयंतौसंवीक्ष्यभूरिश्रवाःराधेयःकर्णश्चउभौ हठात् बलात् रुरुधतुः बाणप्रक्षेपेणनिवारयामासतुः॥७॥अथानंतरं सोमदत्ततनुजःभू

॥तत्रांतरे॥भूपस्तूत्तपमानधीर्भयभराज्जिज्ञासुरिंद्रात्मभूवार्तांसात्यकिमारुतीरिपुचमूव्यूहंप्रतिप्राहिणोत् जित्वातौ रिपुमात्तसिंहनिनदौसंवीक्ष्यभूरिश्रवाराधेयश्चहठादुभौरुरुधतुःसंक्षोभयंतौकुरून्॥७॥अथसोमदत्ततनुजोरमापते रनुजश्चभग्नरथसूतकार्मुकौ परिगृह्यपट्टिशलतांपरस्परंप्रधनंभयानकमुभौवितेनतुः॥८॥अथशिनितनयंनिपात्य भूमावुरसिधृतासिरसौतुसोमदत्तिः गलयितुमिवगर्वसारमंतर्निजचरणेननिपीडयांबभूव॥९॥

रिश्रवाः रमापतेः कृष्णस्य अनुजः कनिष्ठबंधुः सात्यकिश्च उभौभग्नानिरथसूतकार्मुकाणिययोस्तथाभूतौसंतौपट्टिशलतांसरलखड्गाकारमायुधंपरिगृह्यपरस्परंभयानकं प्रधनंयुद्धंवितेनतुःचक्रतुः॥ ८॥अथअसौसोमदत्तिःसोमदत्तपुत्रःभूरिश्रवास्तुशिनितनयंशिनियादवपुत्रंसात्यकिंभूमौनिपात्यउरसिधृतासिः स्थापितखड्गःसन्अंतस्थितंगर्वसारंगर्वरूपसारांशंगलयितुमिवबहिर्निष्कासयितुमिवनिजचरणेननिपीडयांबभूवनिष्पीडयामास॥ ९॥ ॥७०॥ ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदासात्यकिवधसमये दूरगतोपि हरिः कृष्णः अर्जुनस्यरथे अक्षं रथावयवमध्यकाष्ठं नव्यापारयामास रथगमनेन तस्मिन् चेष्टां नोत्पादयामास किं-
तु निजानुजातस्य सात्यकेः उरसि दत्तपादे महारथे महावीरे अस्मिन् भूरिश्रवस्येव अक्षं चक्षुरिंद्रियं व्यापारयामास प्रेषयामास तदाहरिः सात्यकेः-
तादृशीमवस्थां ददर्शेत्यर्थः ॥ १० ॥ हरिणा कृष्णेन चोदितस्य त्वंछिंध्यः सात्यकिर्म्रियते पश्य बाणं मुंच इति प्रेरितस्य किरीटिनः अर्जुनस्य मार्गणेन
बाणेन हृत हस्तपल्लवः छिन्नहस्तः सोमदत्ततनयः भूरिश्रवाः केवलं विगतः हस्तो यस्य तस्य भावः तत्ता तां विहस्ततां नययौ किंतु कौरवाः दुर्योधनप

तदाहरिर्दूरगतोपि नाक्षं व्यापारयामास रथेर्जुनस्य निजानुजातोरसि दत्तपादे भूरिश्रवस्येव महारयेस्मिन् ॥ १० ॥ चोदित
स्य हरिणा किरीटिनो मार्गणेन हृत हस्तपल्लवः सोमदत्ततनुजो न केवलं कौरवा अपि विहस्ततां ययुः ॥ ११ ॥ भूरिश्रवास्तदनु
पुत्रमसुं बलारेर्भूयो विगर्ह्य पुरुषोत्तमसन्निधाने आचम्य पावनमसौ कुशमेकमन्यमास्तीर्य युद्धभुवि तत्र शयालुरासीत् १२

क्षीयाः अपि विहस्ततां ययुः विहस्ततां व्याकुलतामित्यर्थः ॥ ११ ॥ तदनु भूरिश्रवाः पुरुषोत्तमस्य कृष्णस्य सन्निधाने सामीप्ये सति बलारेः पुत्रं अर्जुनं भू
यः बहु यथा तथा विगर्ह्य अन्यासक्तस्य मम हस्तः अलक्षितेन त्वया छिन्नो तस्त्वामधार्मिकं धिगिति वाचा विनिंद्य तत्र युद्धभुवि असौ भूरिश्रवाः पावनं
पवित्रं एकं कुशं जलं आचम्य अन्यत् पावनं कुशं जातावेकवचनं दर्भान् आस्तीर्य शयालुः योगधारणया प्राणमोचनार्थं निषण्णः आसीत् ॥ १२ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।गद्यं।।तदनुहिडिंबवैरीभीमः दिननायककृतस्यकर्णस्यसाहाय्यकेनसहायतयाभयानकसायकानांनिकायंसमूहंवर्षतितथाविधानांअमर्षि
णांक्रोधिनांदर्पेणगरीयसांगुरुतराणांदुःशासनस्ययवीयसांकनिष्ठबंधूनांउज्जासयितुंबंधून्हंतुमित्यर्थः विदलितःविनाशितःविमतमदःशत्रु
गर्वोययातांनिजगदांअष्टाभिःकाष्ठाभिःसमंदिग्भिःसहभ्रामयामास गदायाःस्वस्मिन्प्रहारवंचनायदिवस्यप्राणिभिर्भ्रमितंतदेवदिग्भ्रमणं-
अथवाविलोकयतांभयेननेत्रभ्रमणात्दिशोभ्रमंतीतिप्रतीयते।।२।।प॰युधिपवमानसूनोःगदापुराबाल्यवयसिअश्मनेशिलायैदत्तांदशांचूर्णता

।।गद्यं।।तदनुहिडिंबवैरीदिननायककृतसाहाय्यकेनभयानकसायकनिकायवर्षिणाममर्षिणांदर्पेणगरीयसांदुःशासनय
वीयसामुज्जासयितुंविदलितविमतमदांनिजगदामष्टाभिःकाष्ठाभिःसमंभ्रामयामास।।२।।प॰गांधारराजाजठरसीम्निपुराश्मद
त्तांदत्वादशांयुधिगदापवमानसूनोः दुःशासनानुजकुलायहियोगपद्यांचक्रेमिथोष्टनवतिंत्रिदशीस्तुयातृः।।१२।।   ।।

यस्यांगांधारजायाःगांधार्याःजठरसीम्निजठरसमीपभागेहृदयेदत्वापुत्रमरणवार्ताश्रवणेनहृदयस्फोटोभवतिदुःशासनानुजानांकुलायसमूहाय-
मिथःपरस्परंअष्टनवतिंत्रिदशीःअप्सरसःयातृःभ्रातृजायाःचक्रेयुधिभीमगदापातेनमृतान्स्वर्गगतान्अष्टनवतिसंख्याकान्हत्वाप्सरसोष्टनवतिः
परस्परंयातरोजाताइत्यर्थःभीमस्तनंधयावस्थायांमातुरंकात्शिलायांपतितस्तदासाशिलाचूर्णीबभूवेतीतिहासः।।१२।।   ।।६।।   ।।७।।

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदा वृकोदरः भीमः क्षणात् विशिखेन बाणेन विवस्वतः सुतं कर्णं हताश्वं भग्नरथं मृतसारथिं छिन्नधनुषं छिन्नध्वजपटं चकारेत्यर्थः ॥१४॥ अथ कर्णः क्षणेन आसाद्य आरुह्येत्यर्थः कुरूणां कौरवाणां धुरि अग्रभागे पूर्वं प्रथमं गुणेन धनुषः मौर्व्या एकं आशुगजातं बाणसमूहं निरास्यत् चिक्षेप पश्चात् अटन्या धनुषाग्रेण अपरं अन्यं आशुगजातं वायुपुत्रं भीमं निरास्यत् आकृष्य लं याहीत्युक्त्वा विससर्ज अयं भावः कर्णेन कुंतीसमागमे अर्जुनं विनान्यं लव

विहयं विरथं विसारथिं विशरासं विपताकिकापटं विशिखेन विवस्वतः सुतं विदधान्निस्म वृकोदरः क्षणात् १४ अथान्यमासाद्य रथं क्षणेन कर्णः कुरूणां धुरि कार्मुकस्य पूर्वं गुणेनाशुगजातमेकं पश्चादटन्याप्यपरं निरास्यत् १५ मारुतिस्तदनु सोमदत्तभूपादपांसुपरिधूसरोरसा कंसमर्दनकनीयसा समं शक्रनंदनसमीपमापसः १६ ग० तदनु तदनुजपरिपंथिनि शरपुंजेन कुरुकुंजरान् भंजयंतं धनंजयं तं सुतवधेन कुतमंतुं रिपुं निहंतुमादिश्य दलितदैत्यचक्रेण निजचक्रेण चंडकरमंडलं पिधाने गभस्तिमान स्तमहास्तेति समस्तनिजबलकोलाहलमाकर्ण्य दुःशलाजानिर्मुदा सनिजवदनमुदास ॥२॥ पुत्रं न हनिष्यामीति प्रतिज्ञातत्वात् स्वव

शं प्राप्तोपि भीमो विसृष्ट इति ॥१५॥ तदनु सः कर्णेन मुक्तः मारुतिः भीमः सोमदत्तभुवः भूरिश्रवसः पादपांसुभिः परितः धूसरं ईषत्पांडुरं उरो यस्य तेन कंसमर्दनकनीयसा सात्यकिना समं अर्जुनसमीपं प्राप ॥१६॥ ग० तदनु दनुजपरिपंथिनि दैत्यशत्रौ श्रीकृष्णे शरपुंजेन बाणसमूहेन कुरुकुंजरान् कौरवपक्षीयमुख्यान् भंजयंतं निघ्नंतं तं धनंजयं अर्जुनं सुतवधेन कृतमंतुं कृतापराधं रिपुं जयद्रथं निहंतुं आदिश्य आज्ञाप्य दलितहतं दैत्यचक्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैत्यसमूहो येन तेन निजचक्रेण चंडकरमंडलं सूर्यमंडलं पिदधाने सति आच्छादयति सति गभस्तिमान् सूर्यः अस्तं अहास्त अगमत् इति समस्तानां-
निजबलानां निजसैनिकानां कोलाहलं आकर्ण्य सः दुःशलाजायायस्य सः जयद्रथः मुदा हर्षेण वदनं उदास इदानीमर्जुनस्य कीदृश्यवस्था भविष्यतीति दर्शना
र्थं ऊर्ध्वं चकार भारते तु कृष्णेन मायया तमउत्पाद्य तेन सूर्याच्छादनं अत्र तु चक्रेणोक्तं तत्पुराणानां नरानुरोधेन॥ ३॥ तदाप्रकाशस्य प्रसिद्धस्यापि दिवाकरस्य-
तिरोहितस्य अतिगुप्तस्यापि जयद्रथस्य चक्रमेण अदर्शनाय रवेः आच्छादनाय दर्शनाय जयद्रथस्य दर्शनायापि मुरारेः कृष्णस्य स्वदर्शनं चक्रं हेतुः कारणं

तदाप्रकाशस्य दिवाकरस्य तिरोहितस्यापि जयद्रथस्य अदर्शनायापि च दर्शनाय स्वदर्शनं हेतुरभून्मुरारेः १७ सकलमपि जगंति चक्र
यूथं सवितुरदर्शनतः सखेदमाहुः समरभुवि कथं नु शौरिचक्रं तपनतिरोभवनं तदा च कांक्षे १८ तावत्किरीटी तरुणेंदुमौलेर्वदान्यताकी
र्तिवदावदेन शरेण शत्रोरलुनीत शीर्षं साकं प्रमोदेन सकोरवाणां॥ १९॥ अभूत् सूर्योऽस्तंगत इत्यतो निर्भयतया स्वयं द्रष्टुमागतं जयद्रथं ददर्शेत्य
र्थः॥ १७॥ जगंति सकलमपि चक्रयूथं चक्रसमूहः सवितुः अदर्शनतः अदर्शनेन सखेदं सदुःखं आहुः तदा समरभुवि शौरिचक्रं सूर्याच्छादनं कथं नु आच
कांक्षे इच्छति स्मेत्याश्चर्योक्तिः चक्रयूथं चक्रवाकपक्षिसमूहः इत्यर्थांतरेण परिहारः॥ १८॥ यावज्जयद्रथः पश्यति तावत् सः किरीटी अर्जुनः तरुणेंदुमौ-
लेः शिवस्य वदान्यतायाः औदार्यस्य कीर्तेः वदावदेन वक्त्रा शिवप्रसादलब्धेनेत्यर्थः शरेण शत्रोः जयद्रथस्य शीर्षं कौरवाणां प्रमोदेन सह अलुनीत अच्छि ५
दत् जयद्रथमस्तकछेदे सूर्यं च दृष्ट्वा सूर्यादर्शनेन जातस्य हर्षस्य नाशात् कौरवा दुःखं आपुरिति भावः॥ १९॥ ॥ ७॥ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृत्यक्षत्राद्वृत्यक्षत्नामकजयद्रथपित्रासायं संध्यासमये अर्घ्यायसूर्याय अर्घ्यंदातुं अंजलौकं नालंनपर्याप्तं इतीवइतिमत्वेवजिष्णुः अर्जुनःसिंधु-
राजस्यजयद्रथस्यकंतस्मिन् अंजलौन्यपातयत् पातयामास केनचित्गृहीतंपदार्थमल्पंमत्वास्वनिकटस्थंतमेवपदार्थंददाति कशब्दस्यार्थयोरुदक
शिरसोरेकपदबोधकत्वात्अध्यवसायोक्तिः अत्रेत्यमितिहासः यस्त्वत्सुत्रमस्तकंभुविपातयेत्सः भग्नशिराःसद्यःपतेत् इतिज्ञानशिववरस्यदेशांतरे
तीर्थे तपस्यतःतत्पितुःअंजलौछिन्नंतत्सुत्रजयद्रथमस्तकंपातयेति श्रीकृष्णेनोक्तोर्ज्जुनोबाणपरंपरयातथैवचकारेति ॥ २० ॥ अयंवृत्यक्षत्ता एतत्

वृद्धक्षत्रांजलौसायंनालमर्घ्यायकंधृतं इतीवसिंधुराजस्यजिष्णुस्तस्मिन्न्यपातयत् ॥ २० ॥ एतत्कि
मित्यपमपास्यस्कृतस्यशीर्षंशीर्यन्स्वमूर्धनिवरेणशशांकमौलेः क्षोण्यामवाङ्मुखतयानिपपातवे-
गादाघ्रातुकामइवतत्स्कृतवत्सलत्वात् ॥ २१ ॥ ॥ ॥ ॥

अंजलौपतितंकिंइत्युक्त्वा स्कृतस्यशीर्षंअपास्यभुवित्यक्त्वा शशांकमौलेःवरेणस्वस्यमूर्धनिशीर्यन् भंगंप्राप्नुवन् सन् स्कृतवत्सलत्वात् स्कृतस्नेहात्
तत्स्कृतमस्तकंआघ्रातुकामइव अवघ्राणेच्छुरिवअवाङ्मुखतया अधोमुखत्वेन वेगात् निपपात तत्सुत्रशिरोभूम्यांयःपातयेत् सभग्नशिरा भूमौपते
दितिशिववरानुरोधेनपितुर्हस्तात् पुत्रशिरोभूमौपतितमितिपिताभग्नशिराभूमौपतितइतिभावः ॥ २१ ॥ ॥ ६ ॥ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा· ।।ग०अथवासरविरामेसूर्यास्तसमयेतस्मिन्वासवसूनौ अर्जुनेशिबिरं एत्यरणकथांयथावृत्तंयथाभूतंविज्ञाप्यनिवेद्यहृष्टरोमाणंउद्गतरोमांचंराजानं टी·स्त·

९ उपतिष्ठमानेआनंदयतिसतिसुयोधनस्य क्रोधनतयाक्रोधेनभगिनीजानेः शालकस्यजयद्रथस्यनिधनंमरणंनिदानंआदिकारणंयस्यनियोद्धु- १०

कामस्यदुर्योधनस्य तस्यभावस्तत्तातयासर्वामपिशर्वरींनियोद्धुकामःसन्गंभीरयुद्धारंभसूचकभेरीनिध्वानंउज्जृंभयामासप्रकटीकारयामास दुर्यो

।।ग०अथतस्मिन्वासवसूनौवासरविरामेशिबिरमेत्ययथावृत्तंरणकथांविज्ञाप्यहृष्टरोमाणंराजानमुपतिष्ठमानेसुयोधनस्य

क्रोधनतयाभगि नीजानिनिधन निदानतयासर्वामपिशर्वरींनियोद्धुकामःसन्गंभीरयुद्धारंभभेरीनिध्वानमुज्जृंभयामास ४

।।गद्यं।। एतेतदाकर्ण्यसमयेवैज्ञानिकाः स्मरणमात्रकृतसंधानंनिशिदशगुणितभुजबलावलंबंहिडिंबभागि

नेयंपृथक्प्रस्थाप्यस्वयमपिनिजबलानिसंनाह्यसंयुगायसंयुगायतबाहवःशक्रसुतादयोनिश्चक्रमुः।।५।।

।।श्रीकृष्णायनमः।। ।। ।।

धनंजयद्रथवधेनरात्रौयुद्धंकर्तुमप्ट

त्तइत्यर्थः।।४।।तत्भेरीनिध्वानादिवृत्तंआकर्ण्यएतेसमरेवैज्ञानिकाःकुशलाः संयुगंसमीचीनयुगंतद्वत्आयतौदीर्घौबाहूयेषांतेशक्रसुतादयः

स्मरणमात्रेणकृतंसन्निधानंसान्निध्यंयेनतंनिशिरात्रौदशगुणितंभुजबलंअवलंबते धारयतितथाभूतंहिडिंबस्यभागिनेयं घटोत्कचं पृथक् ९

प्रस्थाप्यस्वयमपिसकलानिबलानिसैन्यानिसन्नाह्यसन्नद्धानिकारयित्वासंयुगाययुद्धंकर्तुंनिश्चक्रमुःनिर्जग्मुः।।५।। ।।९।। ।।९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥प॰ यातारका सततं निरंतरं मे मम विरुत्था विरोधवती वर्तते तां तारकां इमाः सैनिकदृशः बिभ्रति धारयंति इति हेतोः बद्धरोषं धृतक्रोधं तमः सर्वेंद्रि-
येसत्यपि सर्वेषु इंद्रियेषु श्रोत्रादिषु सत्स्वपि सैनिकानां दृशां चक्षुरिंद्रियाणामेव मार्गं रुरोध अन्योपि वीरः स्वशत्रोराश्रयदातारं पीडयति तमसो वि-
रोधिनी तारकाप्रकाशकर्तृ न क्षत्रं तादृशा तारका कनीनिका तयोरेकपदवाच्यत्वादैक्याध्यवसायमाश्रित्येयमुक्तिः॥२२॥ द्रूपेउभयेसैनिकाः तादृ-
शे अनिर्वाच्ये तमसां उज्जृंभणेपि प्रागल्भ्येसत्यपि अक्लीव अद्भुततरं आहवशिल्पं युद्धचातुर्यं चक्रुः प्रकाशयामासुः कीदृशे तमसामुज्जृंभणे शर्वर्याः

पद्यं॥ यातारका मे सततं विरुत्था तां बिभ्रती माइति बद्धरोषं सर्वेंद्रियेसत्यपि सैनिकानां मार्गं दृशामेव तमो
रुरोध॥ २२॥ शर्वर्याश्चिकुरे मनोजशिखिनो धूमेनभोरण्यभूजंबूशाखिनि पेचकांडजदृशामालोकसिद्धांज
ने चेले कालहलायुधस्य तमसामुज्जृंभणे तादृशेप्यक्लीवाहवशिल्पमद्भुततरं चक्रुर्द्वयेसैनिकाः॥ २३॥

रात्रियुवत्याः चिकुरे केशरूपे पुनः की॰ मनोजशिखिनः मदनाग्नेः धूमे पुनः कीदृशे नभ एव अरण्यभूः तत्संबंधिनि जंबूशाखिनि जंबूवृक्षे पुनः की-
दृशे पेचकांडजदृशां उलूकपक्षिचक्षुषां आलोकस्य दर्शनस्य सिद्धांजने यस्मिन् चक्षुषि क्षिप्ते सति अंधस्य दर्शनशक्तिरुत्पद्यते तत्सिद्धांजनं पुनः
की॰ कालः संहारकालः स एव हलायुधः बलभद्रः तस्य चेले वस्त्रे अत्र नैल्यगुणेन तमसि चिकुरत्वाद्यारोपः॥ २३॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰भा॰ ७ निशि अद्भुते प्रधने युद्धे सत्यपि नारदस्य हृष्टेः नेत्रस्य उदग्रा महती प्रथमेतरा अतिवृष्टिरनावृष्टिरितिश्लोकोक्ताद्वितीयाईतिः अनावृष्टिः व्यलसत् टी॰स्न॰ १०
विललास यदीदं युद्धं दिवास्यात्तर्हि नारदहृष्टेः आनंदाश्रूणामतिवृष्टिः स्यादितिभावः त्रिदशनाथस्य इंद्रस्य नगर्या वनिताः स्त्रियोप्सरसोपि वर
णस्रजं चिकुरे एव स्वर्गतनवीनवीरजन्यदेवकेशेष्वेव बबंधुः आसंजयामासुः उभयत्रापि तमसा दर्शनाभावो हेतुः रात्रावागतनवीनवीरजन्यदे
वानामवयवदर्शनाभावादुत्सुकतया वरणस्रजं चिकुरे बबंधुरितिभावः ॥ २४ ॥ अमीषु अद्यावधि चतुर्दशसु युद्धदिवसेषु अयमेव अद्यतन

प्रधनेद्भुतेपि निशि नारदहृष्टेः प्रथमेतराव्यलसदीतिरुदग्रा वनिता अपि त्रिदशनाथनगर्या वरणस्रजं चिकुर एव बबंधुः ॥ २४ ॥
अमीषु युद्धदिवसेष्वयमेव ह्निकामुकः रणोत्सवे विभज्यार्धं रात्रये पि ददौ यतः ॥ २५ ॥ ततः क्षणादेव घटोत्कचोसौ संग्रा
मसीमा परिजृंभमाणः तमीमिमां सांद्रतमां तमोभिर्दंष्ट्राप्रभाभिर्दिवसं वितेने ॥ २६ ॥ ॥ ॥

एवदिवसः कामुकः स्त्रीरक्तः यतः रणोत्सवे अर्धं विभज्य रात्रये पि ददौ अन्योपि कामुको लब्धं पदार्थं प्रियायै विभज्य ददाति ॥ २६ ॥ ततः असौ
घटोत्कचः क्षणादेव संग्रामसीमायाः उपरि ऊर्ध्वभागे जृंभमाणः बृहद्वपुः दधानः सन् तमोभिः सांद्रतमां अतिशयेन निबिडां इमां तमीं रात्रिं दंष्ट्रा ७
प्रभाभिः धवलकांतिभिः दिवसं वितेने चकार ॥ २६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्यातिरोद्भूत्वमाह तिष्ठेति हेद्रोणतिष्ठ मापलायस्व हेसुयोधन द्रुततरं अतिशीघ्रं धावस्व जीवरक्षणार्थं पलायनं कुरु हेदुःशासन त्वांमुंचामि किं
पलायनं माकुरु त्वां नैवमुंचामीत्यर्थः भो आर्यकृप त्वत्कृते ममकृपायाः लेशोपिनास्ति हेगांधाराधिप शकुने रणेतवकाकथा मत्पुरस्तिष्ठसीति वार्ता
पि गगनकुसुमायमाना तद्दुर्मेधसां दुर्बुद्धीनां अग्रणीः मुख्यः मूढतमः कर्णः क्वास्ति इति कटुरवः क्रूरभाषणः सन् अभ्रांतरे आकाशमध्ये व्यभ्राम्यत् वि
शेषेण भ्रमणं चकार ॥ २७ ॥ निजैः स्वकीयैः अट्टहसितैः सशब्दहास्यैः क्षुभ्यंति दशाशामुखानि दशादिक्प्रारंभाः यस्य यत्संबंधीनि आशामुखा-

तिष्ठद्रोणसुयोधनद्रुततरंधावस्वदुःशासनत्वांमुंचामिकिमार्यभोकृपकृपालेशोपिनत्वत्कृते गांधाराधिपकाकथातवरणे
दुर्मेधसामग्रणीः कर्णः क्वेति घटोत्कचः कटुरवोव्यभ्राम्यदभ्रांतरे ॥ २७ ॥ हैडंबेयमसुंनिजाट्टहसितक्षुभ्यद्दशाशामुखंदंष्ट्रां
कूरकरालमात्तपरसुंदृष्ट्वेवकेचिद्भटाः बिभ्युश्चक्षुरमीमिमीलुरवनौपेतुर्मुमूर्च्छुर्जहुः प्राणानारुरुहुर्विमानममरीःप्रापुःप्रमोदंदधुः २८

नि अट्टहासेन क्षुब्धानि बभूवुः तं दंष्ट्राणां अंकुरैः अग्रैः करालं भयंकरं आत्त परसुं गृहीतपरसुं असुं हैडंबेयं घटोत्कचं दृष्ट्वैव केचिद्भटाः यो
द्धारः बिभ्युः भयंप्रापुः ततः अमी चक्षुः नेत्रं मिमीलुः पक्ष्मणोर्मेलनं चक्रुः ततः अवनौ पेतुः ततः मुमूर्च्छुः ततः प्राणान् जहुः तत्यजुः ततः वि
मानं आरुरुहुः ततः अमरीः अप्सरसः प्रापुः लेभिरे ततः प्रमोदं आनंदं दधुः अनयोक्त्या तस्यशब्दे नैवबहवोमृताइतिभावः ॥

॥ २८ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्ररणांगणे नभसि घोररूपंतं घटोत्कचं अभिवीक्ष्य नृपौघे राजसमूहे दिशिदिशि पलायितेसति मरणसमये मुष्टेःलग्नं शस्त्रं यस्यसः कबंध एवछि
न्नशिराःसजीवोभट एव तस्य घटोत्कचस्य अभिमुखःप्रययौ कबंधस्यचक्षुःश्रोत्राद्यभावात् दर्शनश्रवणाद्यभावेन शिरश्छेदात् पूर्वपुरोगमनक्रियया
पुर एवजगामेत्यर्थः॥२९॥ वेदवाक्यैःपितुःपुत्रस्यच ऐकात्म्यं ऐक्यंउक्तमस्ति हिप्रसिद्धं इदं ऐकात्म्यंदृष्टं तथाहि यदा युद्धे भीमात्मजः घटोत्कचः अरिसैन्या
नांस्वयमेव भीमः अभूत् भीमः भयंकरः इत्यर्थांतरक्रोडीकरणात् वाचोयुक्तिः॥३०॥ सः घटोत्कचः व्योम्निस्थित्वा क्वापि कुत्रचित् देशे दृष्टः क्वापि अदृष्टःसन् भिं

नभसितमभिवीक्ष्यघोररूपंदिशिदिशितत्रपलायितेनृपौघे मरणसमयमुष्टिलग्नशस्त्रस्तदभिमुखःप्रययौकबंधएव २९ पितुश्च
पुत्रस्यचवेदवाक्यैर्यदुक्तमैकात्म्यमिदंहिदृष्टं भीमात्मजोहिस्वयमेवयुद्धेभीमोयदासीदरिसैनिकानां ३० भिंदीपालैस्तोमरैःशूलजालैर्व
र्षैरुग्रैश्चोभयेषांनगानां दृष्टःक्वापिक्वाप्यदृष्टोरिसैन्यंव्योम्निस्थित्वानाम्निशेषंसचक्रे ३१ स्वस्वक्षयंनागमदद्यरात्रौदुर्योधनस्यध्वजिनी
तिमत्वा पितृव्यभक्त्यैवसभीमसूनुस्तत्रैवतस्याःक्षयमाततान ३२

भिंदीपालैः रज्जुमयपाषाणक्षेपणीभिः तोमरैः अस्त्रकुंताकारबृहत्फालैरायुधैः शूला
नांजालैःसमूहैश्चउभयेषांद्विविधानांनगानांपर्वतानांवृक्षाणांच उग्रैःवर्षैःवृष्टिभिश्च अरिसैन्यंनाम्निशेषंचक्रे नाम अवशिष्टंतदर्थंसैन्यंतुनष्टंचक्रे इत्यर्थः ३१
अद्यरात्रौदुर्योधनस्यध्वजिनीसेनास्वस्यस्वस्यक्षयंनिवासस्थानंनागमत् इतिमत्वासःभीमसूनुःघटोत्कचःपितृव्येपितुर्बंधौदुर्योधनेयाभक्तिःअनुरागःतयेव
तस्याःध्वजिन्याःक्षयंनिवासस्थानंनाशंच आततानददावित्यर्थःअन्योपिरात्रौ आगताय आप्तजनसंबंधिजनाय निवासस्थानंददाति॥ ३२॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रांतरे तस्मिन्समये सुयोधनः एषः घटोत्कचः क्षणं युध्येत चेत्तर्हि मेमम वाहिन्याः एव अर्धं न नंक्ष्यति न नाशं प्राप्स्यति किंतु मेदिन्याः पृथिव्याः अ
पि अर्धं नंक्ष्यति इति मेने अयं मुहूर्तमात्रं भितः परं युध्येत चेत् तर्हि मां पराभूय मत्पृथिव्या अर्धमपि पांडवेभ्यो दास्यतीति मेने इति भावः ॥ ३३ ॥ गद्यं ॥ इ
त्थं नितांतानां तीव्राणां चिंतानां संतानात् परंपरायाः सकाशात् आर्तस्य पीडितस्य धार्तराष्ट्रस्य दुर्योधनस्य संप्रार्थनस्य गुणनिकया पुनः पुनः करणेन-
संभृतः सिद्धः कृतः सर्वाभिसारः सर्वसैन्यसन्नाहो येन सः मिहिरकुमारः कर्णः महेंद्रः वज्रधारया महीध्रं पर्वतमिव तेन इंद्रेण कवचकुंडलदानसम-

॥ तत्रांतरे ॥ वाहिन्या एव मे नार्धं मेदिन्या अपि नंक्ष्यति क्षणं युध्येत चेदेष इति मेने सुयोधनः ३३ ग० इत्थं नितांतचिंता
संतानादार्तस्य संप्रार्थनगुणनिकया संभृतसर्वाभिसारो मिहिरकुमारो वज्रधारया महेंद्रो महीध्रमिव तेन दत्तया वलक्षाश्वक्षपण
दक्षेयमिति चिररक्षितया महत्या शक्त्या वक्षसि निर्भेद्य क्षणेन तं क्षणदाचरं क्षितौ पातयामास ॥ ५ ॥ प० पौत्रस्य तस्य प्रबलप्र
सिद्धैः प्रहारपीडां प्रतियोधिदत्तां अपारयन् द्रष्टुमिवातिघोरामंतः स्थितो वायुरगाद्बहिष्टात् ॥ ३५ ॥ ॥ ॥

ये दत्ताया इयं शक्तिः वलक्षाश्वस्य अर्जुनस्य क्षपणे वधे दक्षा इति हेतुना चिरं रक्षितया महत्या शक्त्या वक्षसि निर्भिद्य क्षणेन तं क्षणदाचरं घटो
त्कचं राक्षसं क्षितौ निक्षेपयामास पातयामास ॥ ५ ॥ प० प्रबल इति प्रसिद्धिर्यस्य तस्य पौत्रस्य स्वस्य नप्तुः घटोत्कचस्य प्रतियोधिभिः दत्तां अतिघोरां प्र
हारस्य शक्तिप्रहारस्य पीडां द्रष्टुं अपारयन्निव असमर्थः सन्निव अंतः शरीरमध्ये स्थितः प्राणवायुः बहिष्टात् बहिर्भागे अगात् अगमत् ॥ ३४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साशक्तिरपि सांयुगीना: रणेनिपुणा:येजना:तै: सन्नुतं संस्कृतं शौर्यंयस्यतं नराशं राक्षसं अभिहत्य वायुसूनो: भीमस्यपरिघात् गदाया: भीते-
व सावासवस्य सविधं समीपभागं प्रतिपेदे जगाम ॥ ३५॥ गद्यं॥ तदानीं घटोत्कच मरणसमये तत्ररणांगणेतेषांकौंतेयस्य कुरुकुलोत्पन्नस्य
धर्मराजस्य सैन्यानां बाष्पलहरीं नेत्रयो:अश्रुलहरीं निष्पादयितुं मोदविषादयो: आनंदशोकयो: अहमहमिकया इदंकार्यंमयाकर्तुंशक्यमिति

सापिशक्तिरभिहत्यनराशंसांयुगीनजनसन्नुतशौर्यं वायुसूनुपरिघादिवभीतावासवस्यसविधंप्रतिपेदे ३५
॥गद्यं॥तदानींतेषांकौंतेयकौरवसैन्यानां बाष्पलहरीमुत्पादयितुंमोदविषादयोरहमहमिकयास्पर्धासमवर्धत ६

परस्परस्याहंकारोत्पत्त्यास्पर्धासमवर्धत अयंभाव: अर्जुनवधार्थं रक्षितया शक्त्या कर्णेन राक्षसो हत:अतोर्जुनस्य जीवनात् आनंदाश्रूणां प्रा ९
दुर्भाव:महावीरस्य स्वपक्षीय घटोत्कचस्य मरणात् दु:खाश्रूणां प्रादुर्भावइतिभाव: ॥ ६॥ ॥श्रीकृष्णायनम:॥ ॥७॥ ॥७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथजयद्रथ घटोत्कचयोः निधनशोकातिशयाभ्यां गुरून् गुरुत्वयुक्तान् द्वयानपि कुरून् दुर्योधनादीन् युधिष्ठिरादींश्च आश्वासयितुमिवसमा
धानं कर्तुमिव कुरूणांकूटस्थेन मूलपुरुषेण कुमुदबांधवेन चंद्रेणकुलिशायुधस्य इंद्रस्यदिशां प्राचीं एत्य उदयं प्राप्येत्यर्थः काशनी काशैः काश
तृणमंजरीतुल्यैः शुभ्रैः अभीषुभिः किरणेः आकाशदिशानां अवकाशं मध्यभागं व्याकोचायमानेसति प्रफुल्लमिवकुर्वाणेसति कोपेन कुटिली

अथजयद्रथघटोत्कचनिधनशोकातिशयगुरून् द्वयानपि कुरूनाश्वासयितुमिवकुरुकूटस्थेकुमुदबांधवेकुलिशा
युधदिशामेत्यकाशनीकाशैरभीषुभिराकाशदिशावकाशंव्याकोचयमानेसतिकोपेनकुटिलीकृतचापोद्रुपदविराटभूपौ
द्रुतमनीचैर्नाराचैराचार्यशलले:शल्यमृगमिवनिबद्धतनुमातेनतुः॥७॥ प० तस्यार्धमग्नानाराचास्तन्वांतद्विक्रमश्रि
यः रोचंतेस्मप्रहृष्यंत्यारोमांचानामिवांकुराः॥ ३६ ॥ ॥ ॥ ॥

कृतौ बाणानुसंधाय आकर्षेणवक्रीकृतौ चापौयाभ्यांतौ द्रुपदविराटौ द्रुतंअनीचैः महद्भिःनाराचैःआचार्यं शल्यमृगंश्वाविन्तस्युशललैः तदंग
रोमभिरिव बद्धतनुं व्याप्तशरीरं आतेनतुः चक्रतुः॥७॥ प०तस्यद्रोणस्य तन्वांशरीरे अर्धमग्नाः नाराचाः प्रहर्षत्याः प्रकर्षेणहर्षंप्राप्नुवत्याः
तस्यविक्रमश्रियःपराक्रमलक्ष्म्याःरोमांचानांअंकुराइवरोचंतेस्म शुशुभिरे॥३६॥ ॥७॥ ॥७॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथउभौद्रोणद्रुपदौ अग्निवेश्येनऋषिणानिक्षिप्तंस्वस्मिन्स्थापितंकोदंडविद्यायाःधनुर्वेदस्यसर्वस्वंसर्वरहस्यं प्रकाशितं प्रकटितं कुर्वातेस्मचक्रतुः
उभयोर्गुरुबंधुत्वात् स्वस्मिन् गुरुणाक्षिप्तंरणकौशलं अस्त्रमंत्ररहस्यंच प्रकटीचक्रतुरित्यर्थः॥ ३७॥ गद्यं॥ ततःशरसंभवस्यकृपाचार्यस्यभगिनी
कृपीजायायस्यतस्यद्रोणस्यचापएवचतुर्मुखःब्रह्मासमृद्धंविपुलंयथास्यात्तथाविश्राणितौदत्तौविकृतवेषौविकृताकारौ ययोस्तयोरपिविशिख
विमोचनरूपेण सृष्टिशिल्पेनअप्सरसांविलोभनीयौविग्रहौदेहौ ययोस्तौविलोभनीयविग्रहौ अतयातयासंपद्यमानौकृतौतयोःद्रुपदविराटयोरि

अग्निवेश्येननिक्षिप्तमथोभौद्रोणपार्षतौ कोदंडविद्यासर्वस्वं कुर्वातेस्मप्रकाशितं॥ ३७॥ गद्यं॥ ततःशरसंभ
वभगिनीजानेश्चापचतुर्मुखःसमृद्धविश्राणितविकृतवेषयोरपिविशिखमोचनसृष्टिशिल्पेनविलोभनीयविग्र
हीकृतयोर्विराटपांचालयोरहंपूर्विकयावरणोत्सवयौगपद्येसति विबुधपुरविलासिनीनांबिडौजःकुटुंबिन्या
अपिदुःसमाधंविवादमापादयामास ॥ ८॥ ॥ ॥ ॥ ॥

त्यर्थः अहंपूर्वमहंपूर्वमितिभाषणरूपया अहंपूर्विकयावरणोत्सवस्ययौगपद्ये एककालत्वेसतिविबुधपुरस्यविलासिनीनांअप्सरसांबिडौ
जसः इंद्रस्यकुटुंबिन्याः इंद्राण्याःअपिदुःसमाधंदुःखेनसमाधातुमशक्यंविवादकलहं आपादयामास उत्पादयामास द्रोणशरैःमृतयोःप्राप्त १०
दिव्य देहयोःविराटद्रुपदयोः वरणविषयेप्सरसांमहाकलहोभूदितिभावः॥ ८॥ ॥छ॥ ॥छ॥ ॥छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथविराटद्रुपदवधानंतरं तत्रशार्वरीचरस्य घटोत्कचस्यभुजगर्वेणनिर्वर्तिताः त्यक्ताः येपर्वताः तेषांशृंगशिलानांविभंगैः विभंगजन्यप्रहारैः पाटितंवि
दीर्णंशरीरंयस्यास्तथाभूतेवसंध्यायाः रागमिषेणरुधिरधारांउत्सृजंतीसानिशापिविनाशदशांआशुसमाविवेशप्रापनिशागता प्रातःकालोजात
इत्यर्थः॥ ९॥ तदनुकोककुटुंबिनीनांचक्रवाकस्त्रीणांनग्नंकरणेकोकेन कोकीनग्नाक्रियतेअनेनेत्यर्थात् रव्युत्पादके इत्यर्थः महसिसूर्यरूपेते-

अथतत्रशार्वरीचरभुजगर्वनिर्वर्तितपर्वतशृंगशिलाविभंगपातिनशरीरे वसंध्यारागमिषेणरुधिरधारामुत्सृजंती सानिशा
पिविनाशदशामाशुसमाविवेश॥ ९॥ तदनुकोककुटुंबिनीनांनग्नंकरणेमहसिसमारूढविहायसिक्रोधनिद्रानिरोध
साधारणीभवदरुणिमदृक्प्रतिफलनैरायोधनधरणीरुधिरधुनीषुपंकेरुहाण्यंकूरयंतोघटोत्कचविराटपांचालपंच
तामपंचहेरभारतयाशुरोरायुर्हेतुमलिकाक्षरंपरिमार्ष्टुमलीकंवचनमेकंभवताप्रयुज्यतामितिधर्मजातमनुकूलयंतो
वसुदेवपासवकुमारादयःप्रथमसन्निकृष्टस्य धृष्टद्युम्नस्यवरूथिनीविमाथिनींवारणधोरणीप्रवेताइवपयोधरपरंप
रांपुरोधायभृशंरवस्यगुणंशंरवस्यपरिपूरणेन दुर्वहंकुर्वंतंकौरवसेनापतिमभिजग्मुः॥ १०॥ नसिसमारूढंविहायः आकाशो
येनतस्मिन् सतिउदितेसतीत्यर्थः क्रोधश्चनिद्रानिरोधश्चतयोः साधारणीभवन् अरुणिमायासांतासां दृशांमतिफलनैः प्रतिबिंबैः रणभूमिसंबं-
धिरुधिरनदीषुकमलानि अंकुरयंतः उत्पादयंतः घटोत्कचविराटद्रुपदानांपंचतयावधेनप्रपंचन् विस्तीर्णोभवन् वैरभारोयेषांतेषांभावस्तत्तात

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याग्गुरोः द्रोणस्य आयुषः हेतुं अलिकाक्षरं ब्रह्मणालिखितं भालाक्षरं परिमार्ष्टुं तं हंतुमित्यर्थः भवताएकं अलीकं असत्यं वचनं प्रयुज्यतांउच्यतांइति

भाषणेन धर्मराजं अनुकूलयंतः कृष्णाभीमार्जुनादयः प्रथमं सन्निकृष्टस्य समीपस्थस्य धृष्टद्युम्नस्य वरूथिन्याः सेनायाः विमाथिनीं संहर्त्रीं वारणधो

रणीं गजपरंपरां प्रचेताः वरुणः पयोधराणां मेघानां परंपरामिव पुरोधाय अग्रतः कृत्वा शंखस्य पूरणेन मुखवायुना पूरणेन खस्य गुणं शब्दं दुर्वहं दुःखेनैव

॥पद्यं॥ कोपेनतावत्कुटिलः सभीमः कुंभानभांक्षीद्गदयाद्विपानां नाम्नैकदेशोपिच
कुंभयोनेरेतैर्धृतोभूदितिमत्सरीव ॥ ३८॥

वोढुमशक्यं अतिमहांतमित्यर्थः कुर्वंतं कौरवसेनापतिं द्रोणं अभिजग्मुः॥१०॥प० यावत् जग्मुः तावत्कोपेनकुटिलः भयंकरः सः भीमः एतैः गजैः कुंभयोनेः

अस्मच्छत्रुपक्षीयद्रोणस्यनाम्नैकदेशः कुंभः तदर्थं कटः धृतः सएववाकुंभशब्दः कुंभिनाम्नि धृतः अभूत् शत्रुपक्षीयत्वे सति इदमपि हंतमित्यपि ११

शब्दार्थः इतिहेतोः मत्सरीसन्निव गदयागजानां कुंभानभांक्षीत् अस्फोटयत् ॥३८॥ ॥छ॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ तत्र तांकरिघटांगजसमूहंपाटयताभीमेनद्रोणस्रुतस्य अश्वत्थाम्नः सनाम्निसमाननाम्निहस्तिनि अश्वत्थामसंज्ञकगजे प्रचुरः मदः गर्वः दानंच यस्य सः स्वस्यवशांकरिणींस्ववशानूजनांश्च अनुवर्तते तन्छील:शुभतरेः मणिभिः रत्नैः शुभतरेणमणिनाचदेदीप्यमानंमस्तकंयस्यसः अयंअश्वत्थामाहतइ तिधर्मतनयेनधर्मराजेननिगदितंकर्णयोः अरूंतुदंमर्मस्पृक् अभ्यर्णसमीपं आकर्ण्यवैवर्ण्येनभरितंवदनं यस्यतं स्रुतनाशशोकमोहेन अश्वत्थाममरण शोकजन्यमोहेन परित्यक्तः चापोयेनसः शयः हस्तोयस्यतंस्थंडिलेशयंयोगधारणयाप्राणान् मोक्तुंशुद्धभूमौनिषण्णंभारद्वाजंद्रोणंआलोक्यहृष्टधीः

ग॰ तत्रतांकरिघटांपाटयताघटोत्कचजनकेनद्रोणस्रुतस्यसनाम्निहस्तिनि निपातितेसतिप्रचुरमदःस्ववशानुवर्तीशुभतरम णिदेदीप्यमानमस्तकोयमश्वत्थामाहतइतिधर्मतनयनिगदितं कर्णारुंतुदमभ्यर्ण माकर्ण्यवैवर्ण्यभरितवदनंस्रुतशोक मोहेनपरित्यक्तचापशयंस्थंडिलेशयंभारद्वाजमालोक्यहृष्टधीर्धृष्टद्युम्नोनिजपितृबंधनस्मृतिजनुषारुषासत्वरमभिहंतु मुदयुंक्त॥११॥ एकेनखड्गंद्रुपदस्यसूनुःकरेणचान्येनकचंगृहीत्वा विलूयशीर्षंगुरुमप्यमुंद्रागंतेवसंतंकलयांचकार॥३९

धृष्टद्युम्नःनिजपितुःद्रुपदस्यबंधनं अर्जुनेनकारितंतस्यस्मृतेःसकाशात्जनुःउत्पत्तिर्यस्याःतयारुषाक्रोधेन सत्वरं अभिहंतुं उदयुंक्त उद्युक्तोबभू व॥११॥ प॰ द्रुपदस्यसूनुः धृष्टद्युम्नः एकेनकरेण खड्गंगृहीत्वा अन्येनकरेण कचंकचान् गृहीत्वाशीर्षंविलूयछित्वा गुरुमपि अमुंद्रोणंद्राक् शीघ्रंअंतेवसंतंशिष्यंमृत्यौतिष्ठंतंचकलयांचकार संपादयामास द्रोणाचार्यंजघानेत्यर्थः॥३९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनुसचासौतादृशश्चतत्तादृशः तंतातस्यवधंत्यक्तशस्त्रसमाधिस्यतातस्यवधंनिशम्यश्रुत्वाकोपातिरेकेणकोपाधिक्येनकलुषःक्षुब्धःकृपस्य भा
गिनेयःअश्वत्थामाआग्नेयंअग्निदेवताकंअस्त्रंमंत्रितशरंअमुंचत् यस्मिन्आग्नेयास्त्रेशत्रुसैन्निकानांअक्षौहिणीशलभतांपतंगत्वंलभतेस्म भा
प भस्मीबभूवेत्यर्थः॥५०॥ततःस्वराधीश्वरसूनुनाअर्जुनेनमुक्तंयत् ब्रम्हास्त्रं तस्य भासातेजसा भृशंधिक्कृतेन पराभूतेन गुरुनंदनस्य अश्वत्थाम्नः
अस्त्रेणसहभानुःमंदायमानाद्युतिःतेजोयस्यतथाभूतःआसबभूव तदासूर्यास्तसमयोजातइत्यर्थः गतिदीप्त्याद्यर्थकस्य भ्वादेरसतेःधातूनामने-

तत्तादृशंतदनुतातवधंनिशम्यकोपातिरेककलुषःकृपभागिनेयः आग्नेयमस्त्रममुचत्परसैनिकानामक्षौहिणीशलभतां
लभतेस्मयस्मिन् ५० ततःस्वराधीश्वरसूनुमुक्तब्रम्हास्त्रभासाभृशधिक्कृतेन अस्त्रेणसार्धंगुरुनंदनस्यमंदायमानद्युतिरास-
भानुः ५१ धृतराष्ट्रसुतोपिगेहमागाच्छिन्नदीपांकुरदीनदीनदीप्तिः शकलीकृतबाहुकर्णनासैःसहयोधैःसघटोत्कचाश्मवर्षात् ५२
॥ ॥इत्यनंतभट्टकृतौश्रीमतिचंपूभारते दशमस्तबकः संपूर्णतामगमत्॥ ॥६॥ ॥६॥ ॥६॥

कार्यत्वात् सत्तार्थेलिटिरूपं॥५१॥ दिनेयःदीपांकुरः अल्पदीपः तद्वत् दीनात् दीनामंदेत्यर्थः दीप्तिर्मुखकांतिर्यस्यसः दुर्योधनः घटोत्कच
स्य अश्मवर्षात् पाषाणवृष्टेःशकलीकृताःशकलीभूताःत्रुटिताइत्यर्थः बाहुकर्णनासाःयेषांतैःसहगेहंशिबिरं अगमत्॥ ५२॥ ॥ १२
इतिश्रीचंपूभारतटीकायांश्रीखंडोपाध्येबाजीरावात्मजनारायण सूरिविरचितायांदशमस्तबकःसमाप्तिमगमत्॥ ॥६॥ ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.12.19 10:36
,TRANSFERRED=2019/12/02 at 10:39:56
,PAGES=25
,TYPE=STD
,NAME=S0002239
,Book Name=M-304-BHARAT CHAMPU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection